तत्र [1]षत्वं प्रति नत्वस्य सिद्धत्वाद् झलादिर्निष्ठा न भवति। कुत्वे तु कर्तव्ये तदसिद्धमेव इति प्रवर्तते कुत्वम्। ङिति – वृश्चति। वरीवृश्च्यते। प्रच्छ – पृष्टः। पृष्टवान्। ङिति – पृच्छति। परीपृच्छ्यते। प्रश्नः। नङि तु 'प्रश्ने चासन्नकाले' (३.२.११७/२७७७) इति [2]निपातनादसंप्रसारणम्। भ्रस्ज – भृष्टः। भृष्टवान्। ङिति – भृज्जति। बरीभृज्यते। सकारस्य 'झलां जश् झशि' (८.४.५३/५२) इति [3]जश्त्वेन दकारः, 'स्तोः श्चुना श्चुः' (८.४.४०/१२१) इति [4]श्चुत्वेन जकारः॥

## लिट्यभ्यासस्योभयेषाम्। (१७/२४०८)

उभयेषां वच्यादीनां [5]ग्रह्यादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति। वचि – उवाच। उवचिथ। स्वपि – सुष्वाप। सुष्वपिथ। [6]यज इयाज। इयजिथ। डुवप् – उवाप। उवपिथ। ग्रह्यादीनाम् – [7]तत्र ग्रहेरविशेषः। [8]जग्राह। जग्रहिथ। ज्या – जिज्यौ। जिज्यिथ। वयि – उवाय। उवयिथ। व्यध – विव्याध। विव्यधिथ। वश – उवाश। उवशिथ। [9]व्यच – विव्याच। विव्यचिथ। वृश्चतेः सत्यसति वा योगे नास्ति विशेषः। योगारम्भे [10]तु सति यदि[11] सम्प्रसारणमकृत्वा हलादिशेषेण (७.४.६०/२१७९) रेफो निवर्त्यते, तदा वकारस्य सम्प्रसारणं प्राप्नोति। अथ रेफस्य सम्प्रसारणं कृत्वा उरदत्वं रपरत्वं च क्रियते, तदानी– [12]मुरदत्वस्य स्थानिवद्भावात् 'न सम्प्रसारणे सम्प्रसारणम्' (६.१.३७/३६३) इति प्रतिषेधो भवति इत्यस्ति विशेषः। वव्रश्च। वव्रश्चिथ।

पृच्छतिभृज्जत्योरविशेषः। अकिदर्थं [13]चेदमभ्यासस्य सम्प्रसारणं विधीयते। किति [14]हि परत्वाद् [15]धातोः सम्प्रसारणे कृते [16]पुनः प्रसङ्ग[17]विज्ञानाद् द्विर्वचनम्, ऊचतुः, ऊचुः इति।

अधिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषाम् इति वचनं हलादिः [18]शेषम् (७.४.६०/२१७९) अपि बाधित्वा सम्प्रसारणमेव यथा स्यात् इति। विव्याध[19]॥

## स्वापेश्चङि। (१८/२५८४)

स्वापेः इति स्वपेर्ण्यन्तस्य ग्रहणम्। तस्य चङि परतः संप्रसारणम् भवति। [20]असूषुपत्, असूषुपताम्, असूषुपन्। द्विर्वचनात् पूर्वम्[21]अत्र संप्रसारणम्, तत्र [22]कृते लघूपधगुणः, [23]तस्य णौ चङ्युपधायाः (७.४.१/२३१४) [24]ह्रस्वत्वम्, ततो द्विर्वचनम्, 'दीर्घो लघोः' (७.४.९४/२३१८) इति [25]दीर्घत्वम्। चङि इति किम्? स्वाप्यते। स्वापितः। किति [26]इति निवृत्तम्। ङिति इति केवलमिहानुवर्तते [27]इत्येतद् दुर्विज्ञानम्॥

---

1. षत्वे कर्तव्ये क. 2. निपातनात् संप्रसारणम् न भवति क. 3. जश्त्वेन नास्ति फ, जश्त्वे क. 4. श्चुत्वं फ. ह. 5. ग्रहादीनाम् ड. ह. 6. यजि ह. 7. तत्र नास्ति ह. 8. जग्राह नास्ति ह. 9. व्यचि ह. 10. तु नास्ति फ. 11. पक्षान्तरे इत्यधिकम् क. 12. उरत्वमस्य ड, चर्त्वस्य क. 13. चेत् नास्ति फ. 14. तु फ. 15. धातोः नास्ति क. 16. न इत्यधिकम् क. 17. ग्रहण इत्यधिकम् ग. ह. 18. शेषम् नास्ति फ. 19. विव्यध इत्यधिकम् क. ड, विव्यधिथ इत्यधिकम् ग. 20. असूष्वपत् असूष्वपताम्, असूष्वपन् क. 21. अत्र नास्ति क. 22. क्रियते फ. ह, अधिकृते क. 23. तत्र फ, ततः क. 24. ह्रस्वः फ. ह. 25. दीर्घः क. 26. इति नास्ति ब. 27. इति चङि वचनम् ड, दुर्विज्ञेयम् ग.